**सेंट मारग्रेट सीनियर सेकंडरी स्कूल**

**डी ब्लॉक, प्रशान्त विहार, रोहिणी, दिल्ली - 110085.**

**प्रतिदर्श प्रश्न-पत्र**

# संस्कृतम् (कोड् सङ्ख्या-119)

**कक्षा : नवमी** **विषयः - संस्कृतम्**

**अवधिः - होरात्रयम्** **पूर्णांकाः - 80**

**निर्देशाः -** (1) **प्रश्नपत्रे चत्वारः खण्डाः सन्ति।**

**खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः**

**खण्डः (ख) - रचनात्मककार्यम् – 15 अङ्काः**

**खण्डः (ग) - अनुप्रयुक्त-व्याकरणम् – 25 अङ्काः**

**खण्डः (घ) - पठित-अवबोधनम् - 30 अङ्काः**

(2) **सर्वे प्रश्नाः अनिवार्याः ।** (3) **प्रश्नानां उत्तराणि खण्डानुसारम् क्रमेणैव लेखनीयानि।**

(4) **प्रश्नसंख्या अवश्यम् लेखानीया।** (5) **उत्तराणि संस्कृतेन एव लेखनीयानि।**

## {खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः}

**प्रश्न 1.अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्त प्रश्नानानाम् उत्तराणि लिखत : -**(10)

ज्ञानप्राप्ति कृते अनेकानि साधनानि भवन्ति। कक्षायां वयं पुस्तकेभ्यः ज्ञान प्राप्तुमः, परं व्यावहारिक ज्ञानं जगतः प्राप्तुं शक्यते, यद्धि जीवनाय परमोपयोगि। व्यावहारिकज्ञानस्य प्राप्तिकृते लोकव्यवहारः सर्वाधिक महत्त्वपूर्ण साधनमस्ति। लोकव्यवहारज्ञानं देशस्य विभिन्नप्रदेशानां पर्यटनेन सरलतया भवति। सममेव तत्रत्य-संस्कृति-वेषभूषा-वातावरण-भूगोल-इतिहास-उत्सव-प्रथादीनां विषयाणां ज्ञानं भवति। एतदेव कारणं यद् विद्यालयेषु छात्राणां कृते अवकाशकाले शैक्षणिकयात्रायाः आयोज़नं क्रियते।

I. एकपदेन उत्तरत

(i) ज्ञानप्राप्ति कृते कति साधनानि भवन्ति? (ii) व्यावहारिकं ज्ञानं कुतः प्राप्तुं शक्यते?(1x2=2)

II. पूर्णवाक्येन उत्तरत (2x2=4)

(i) विभिन्नप्रदेशानां पर्यटनेन केषां ज्ञानं भवति?

(ii) व्यावहारिकज्ञानप्राप्तये महत्त्वपूर्ण साधनं किम्?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत (1x3=3)

(i) 'प्राप्नुमः' इति क्रियापदस्य कर्तृपदं किम्?

(क) कक्षायाम् (ख) वयम् (ग) छात्राणाम् (घ) जीवनाय

(ii) 'विद्यार्थिनाम्' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(क) विषयाणाम् (ख) प्रथादीनाम् (ग) छात्राणाम् (घ) शैक्षणिकयात्रायाः

(iii) 'मृत्युकाले' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) प्राप्तुम् (ख) क्रियते (ग) जीवनाय (घ) सरलतया

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत। (1)

**{खण्ड: (ख) - रचनात्मककार्यम् – 15 अङ्का:}**

**प्रश्न 2.मित्रं प्रति अधोलिखितम् पत्रं मञ्जूषा -प्रदत्तशब्दैः पूरयित्वा पुनः लिखत।(1/2x10=5)**

**मञ्जूषा -**

| |
|---|
| प्रणामाञ्जलि, अध्यापकाः, धनादेशद्वारा, पञ्चशतम्, द्वीपे, इच्छामि, नेष्यन्ति, प्रणमामि, आगामिमासस्य, अर्धवार्षिकपरिक्षा |

माननीयाः पितृवर्याः !

सादरं (i)……………..

अत्र कुशलं तत्राप्यस्तु। मम (ii)………………..समाप्ता। परिक्षापत्राणि अतिशोभनानि जातानि। परिक्षा परिणामश्च (iii)……………….प्रथमसप्ताहे उद्घोषयिष्यते। अत्रान्तरे, अस्माकं विद्यालयस्य (iv)…………………… अस्मान् शैक्षनिकभ्रमणाय मुम्बईतः नातिदूरे एकस्मिन् (v)……………..स्थिताम् एलोरा -गुहां प्रति (vi)……………….। अत्र प्राचिनानि शिवमन्दिराणि सन्ति। अहमपि तत्र गन्तुम् (vii)……………………..। एतदर्थम् अस्माभिः (viii)……………. रुप्यकाणि दातव्यानि सन्ति। कृपया (ix)……………………उपर्युक्तां राशिं संप्रेष्य माम् अनुगृहीतां कुर्वन्तु। गृहे सर्वेभ्यः मम (x) ………………….. निवेदनीयः।


भवतां प्रियपुत्री

मदालसा

**प्रश्न 3. अधोदत्तम् चित्रम् दृष्ट्वा मंजूषायाम् प्रदत्त-शब्दानाम् सहायतया संस्कृतेन पञ्चवाक्यानि लिखत : - (1x5=5)**

**मञ्जूषा**

| |
|---|
| उड्डीयते, नरम्, कूपात्, पाययति, काकः, गगने खगाः, जलं, वृक्षस्य, एका महिला, रज्ज्वा, प्रतीक्षते, निष्कासयति, उपरि, द्विमहिले। |



**अथवा**

**'मम विद्यालयः' इति विषयम् अधिकृत्य मंजूषायाम् प्रदत्त-शब्दानाम् सहायतया संस्कृतेन पञ्चवाक्यानि लिखत।**

**मंजूषा**

| |
|---|
| तरणतालः , भवनम् , क्रीडाक्षेत्रम् , छात्राः , पुस्तकालयः , छात्रान् , अध्यापकाः , पुस्तकानि, पादकंदुकेन, पाठयन्ति, वृक्षाः , क्रीडन्ति |

**प्रश्न 4. मञ्जूषातः पदानि चित्वा कथां पूरयत-** **(1/2x10=5)**

| | | | | |
|---|---|---|---|---|
| दृष्ट्वा | स्वकीयैः | कृतवान् | कर्तनम् | वृद्धः |
| साट्टहासम् | तर्हि | क्षुद्रः | मोचयितुम् | अकस्मात् |

एकस्मिन् वने एकः --------------------- व्याघ्रः आसीत्। सः एकदा व्याधेन विस्तारिते जाले बद्धः अभवत्। सः बहुप्रयासं --------------------- किन्तु जालात् मुक्तः नाभवत्। --------------------- तत्र एकः मूषकः समागच्छत्। बद्धं व्याघ्रं --------------------- सः तम् अवदत्-अहो! भवान् जाले बद्धः। अहं त्वां --------------------- इच्छामि। तच्छ्रुत्वा व्याघ्रः --------------------- अवदत्-अरे! त्वं --------------------- जीवः मम सहाय्यं करिष्यसि। यदि त्वं मां मोचयिष्यसि --------------------- अहं त्वां न हनिष्यामि। मूषकः --------------------- लघुदन्तैः तज्जालं --------------------- कृत्वा तं व्याघ्रं बहिः कृतवान्।

**{ खण्डः (ग) - अनुप्रयुक्त-व्याकरणम् – 25 अङ्काः}**

**प्रश्न 5. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा संधिम् संधिच्छेदम् वा कुरुत :-**

**(i) प्रतिदिनं <u>विद्याभ्यास:</u> करणीय: ।** **(1)**

(क) विद्या + अभ्यासः (ख) विद्य + अभ्यास (ग) विद्याया: + अभ्यास (घ) विद्याया + अभ्यास

**(ii) एषा कथा <u>हित + उपदेशात्</u> गृहीता।** **(1)**

(क) हितउपदेशात (ख) हितिपदेशात (ग) हितोपदेशात् (घ) हितोपदेशातत्त

**(iii) <u>प्रति + एकम्</u>** (1)

(क) प्रत्येकम (ख) प्रत्येकम् (ग) परतकम (घ) प्रतिकम

**(iv) स: <u>वृथा + एव</u> भ्रमति।** (1)

(क) वृथैव (ख) वरीथव (ग) वृथेव (घ) वृथाइवी

**प्रश्न 6. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा रिक्तास्थानानि पूरयत :-**

**(i) --------------- गङ्गा सर्वश्रेष्ठा अस्ति।** (1)

(क) नदीषु (ख) नदीम् (ग) नद्याम् (घ) नद्या

**(ii) ------------------ पुष्पाणि शोभते।** (1)

(क) लताया (ख) लतासु (ग) लताभिः (घ) लताभ्यः

**(iii) मोहन: --------------- फलानि आनयति।** (1)

(क) मुनये (ख) मुने (ग) मुनि (घ) मुनिम

**(iv) ------------ श्रीगुरवे नमः।** (1)

(क) तस्य (ख) तस्मै (ग) तस्मिन् (घ) तेन

**प्रश्न 7. उचितधातुरूपाणि चित्वा रिक्तास्थानानि पूरयत :-**

**(i) सर्वे जना: निरामयाः ------------ ।** (1)

(क) अस्तु (ख) सन्तु (ग) अस्ति (घ) स्यात्

**(ii) सर्वे ---------------- सुखिन:।** (1)

(क) भवतु (ख) भवन्तु (ग) भवत (घ) भवन्तः

**(iii) श्व: अहम् अपि संस्कृतम् -------------।** (1)

(क) पठानि (ख) पठिष्यामि (ग) पठामि (घ) पठिष्यसि

**(iv) वयम् विद्यालये संस्कृतम् ----------।(पठ् धातु, विधिलिङ्लकार)** (1)

(क) पठेयम् (ख) पठेव (ग) पठेम (घ) पठेत्

**प्रश्न 8. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा लिखत : -** (1x4=4)

1.------------- उभयत: वनम् अस्ति।

क. ग्रामम् ख. ग्रामात् ग. ग्रामेण घ. ग्रामस्य

2. पुत्रः --------------- सह गच्छति।

क. मातरम् ख. मात्रे ग. मात्रा घ. मातु:

3.दुष्टः ------------------- क्रुध्यति।

क. सज्जन: ख. सज्जनाय ग. सज्जना: घ. सज्जनम्

4.गङ्गा --------------- प्रभवति।

क. हिमालयम् ख. हिमालयेन ग. हिमालयस्य घ. हिमालयात्

**प्रश्न 9. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा लिखत : -**

**(i) सिंहम् <u>दृष्ट्वा</u> बालक: त्रस्यति।** (1)

(क) दृश् + क्त्वा (ख) दृष् + कत्वा (ग) दृस + कत्वा (घ) दृषि + क्त्वा

**(ii) वस्तूनि <u>विक्रीय</u> व्यापारी गृहम् आगत:।** (1)

(क) वि + क्री + ल्यप् (ख) वि + कृ + ल्यप् (ग) वी + क्री + ल्याप्प (घ) वी + कृ + लयप

**(iii) सा भोजनम् <u>खादितुम्</u> भोजनालयं गच्छति।** (1)

(क) खादि + तुमुन् (ख) खाद् + तुमुन् (ग) खादितु + म् (घ) खाद + तुम

**प्रश्न 10. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा लिखत : - (1x2=2)**

1. ---------- अयोध्याया: राजा दशरथ: आसीत्।

क. सदा ख. विना ग. पुरा घ. सहसा

2. मूर्खजना: समयम् --------- यापयन्ति।

क. मृषा ख. कदापि ग. मा घ. वृथा

**प्रश्न 11. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा लिखत : - (1x2=2)**

1.भास: ---------- (13) नाटकानि अलिखत्।

क. त्रयोदशी ख. त्रयोदश ग. त्र्योदशानि घ. त्र्योदशा:

2. मम ---------- (4) मित्राणि सन्ति।

क. चत्वारि　　ख. चत्वारो　　ग. चत्वारः　　घ. चतसर:

**प्रश्न 12. (1.) 'ग्' वर्णस्य किम् उच्चारणस्थानम् अस्ति ?** **(1x2=2)**

क. कण्ठ:　　ख. तालु:　　ग. दन्ता:　　घ. ओष्ठौ

**(2.) 'द्' वर्णस्य किम् उच्चारणस्थानम् अस्ति ?**

क. तालु:　　ख. मूर्धा　　ग. दन्ता:　　घ. कण्ठ:

**{ खण्ड: (घ) - पठित-अवबोधनम् - 30 अङ्का:}**

**प्रश्न 13. अधोलिखितम् गद्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत :-**

इत्युक्त: पिता अधोलिखितदृष्टान्तेन तत्त्वज्ञाम् प्रतिपादयति : -

आरुणि: - श्वेतकेतो ! न्यग्रोधफलम् आहर।

श्वेतकेतु: - इदम् भगवन्।

आरुणि: - अत्र किम् पश्यसि ?

श्वेतकेतु: - अनुतरानी इमानि बीजानि।

आरुणि: - येषु एकम् बीजम् भिन्धि।

श्वेतकेतु: - भिन्नम्।

आरुणि: - अत्र किम् पश्यसि ?

श्वेतकेतु: - न किञ्चन भगवन्।

इदम् श्रुत्वा पिता पुत्रम् उवाच - हे सौम्य ! पश्य अत्र वटबीजे एव महान् स्थूल: शाखादिमान् न्यग्रोध: वट: उत्पन्न: सन् तिष्ठति। एवं अणिम्नः स्थूलम् जगद् उद्भवति। विश्वसिहि, हे सौम्य ! स: एव आत्मा। तत् एव सत्। तत् त्वम् असि।

**I.एकपदेन उत्तरत -**

क. आरुणि: श्वेतकेतुम् किम् आनेतुम् आदिशत् ? (1/2)

ख. श्वेतकेतु: न्यग्रोधफले किम् अपश्यत् ? (1/2)

**II.पूर्णवाक्येन उत्तरत -**

सर्वेषु देहेषु क: अस्ति य: अजर: अमर: च ? (2)

**III.यथानिर्देशम् उत्तरत : -**

क.'अनिम्नः स्थूलम् जगद उद्भवति।' अस्मिन् वाक्ये विशेषणपदम् किम् प्रयुक्तम् ? (1)

ख. 'सूक्ष्मः' इति पदस्य विलोमपदम् पाठात् चित्वा लिखत। (1)

**प्रश्न 14. अधोलिखितम् पद्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत :-**

निम्ब ! त्वदीयकटुता यदि दाहहन्त्री, गायन्तु मूढमनुजास्तव दोषगाथाः।

तप्तास्त एव तपनोपमपित्ततापैः , गास्यन्ति मित्रवर ! तावक गीतकानि।।

**I.एकपदेन उत्तरत -**

(i) कस्य तरोः कटुता दाहहन्त्री ? (1/2) (ii) गीतकानि के गास्यन्ति ? (1/2)

**II.पूर्णवाक्येन उत्तरत - (2)**

मूढमनुजाः किम् गायन्ति ?

**III.यथानिर्देशम् उत्तरत : -**

क. 'निम्ब ! त्वदीय-कटुता यदि दाहहन्त्री।' अस्मिन् वाक्ये 'मधुरता' इति पदस्य किम् विलोमपदम् प्रयुक्तम् अस्ति ? (1)

ख. 'गायन्तु मूढमनुजास्तव दोषगाथाः' अस्मिन् वाक्ये 'मूढमनुजाः' इति कर्तृपदस्य किम् क्रियापदम् प्रयुक्तम् ? (1)

**प्रश्न 15. अधोलिखित-नाट्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत :-**

द्वारपालः - जयतु देवः ! द्रविडदेशीयः लक्ष्मीधरनामा कश्चित् विद्वान् देवस्य दर्शनार्थम् द्वारदेशम् अध्यास्ते।
भोजः - सादरम् प्रवेशाय।
द्वारपालः - यथा आदिशति देवः। (निष्क्रान्तः)
लक्ष्मीधरः - (द्वारपालेन सह प्रविश्य) राजन् ! अभिवादये भवन्तम्। दिनकरदीप्तिरिव भवत्कीर्तिः दिक्षु प्रसारम् आप्नोतु। वर्धन्तां विभवाः सौख्यानि च। लसन्तु सम्पदः विलयम् व्रजन्तु च विपदः। प्रतिष्ठाम् लभताम् विद्वद्गणः। सततं एधताम् विद्यासु कलासु च भवदनुरागः। श्रूयताम् -
क्षमा दाता गुणग्राही स्वामी पुण्येन लभ्यते।
अनुकूलः शुचिर्दक्षः कविर्विद्वान् सुदुर्लभः।।
भोजः - अनुगृहीतोऽस्मि। कुतः समागमनम् अत्रभवताम्।
लक्ष्मीधरः - राजन् ! यत्र जलपूर्णम् सरः भवति तत्र पक्षिणः स्वयं समायान्ति।

I.एकपदेन उत्तरत - (1/2x2=1)

क. कः विद्वान् राजदर्शनार्थम् समायातः ? ख. लक्ष्मीधरेण कस्मै आशीर्वादः दीयते ?

II.पूर्णवाक्येन उत्तरत - (2)

लक्ष्मीधरेण कः आशीर्वादः राज्ञे प्रदत्तः ?

III.यथानिर्देशम् उत्तरत : -

क. दिनकर --- अस्मिन् वाक्ये क्रियापदम् किम् ? (1)
ख. तत्र ---- अत्र 'समायान्ति' क्रियापदस्य किम् कर्तृपदम् प्रयुक्तम् ? (1)

**प्रश्न 16. श्लोकस्य अन्वयम् कुरुत : - (2)**

**(ख) गच्छन् पिपीलिको याति योजनानाम् शतान्यपि।**

**अगच्छन् वैनतेयोपि पदमेकम् न गच्छति।।**

**अन्वयः -** गच्छन् **(i)** ---------- योजनानाम् **(ii)**------------अपि

याति। अगच्छन् **(iii)** ------------- एकम् पदम् अपि न **(iv)** ------------।

**प्रश्न 17.अधोलिखित वाक्येषु रेखांकित पदानि आधृत्य प्रश्न-निमाणम् कुरुत : -**

**(i) <u>अविवेकता</u> अपि अनर्थाय।** (1)

(क) किम् (ख) का (ग) केन (घ) कस्य

**(ii) एकः चंद्रः <u>तमः</u> हन्ति।** (1)

(क) किम् (ख) केषु (ग) कस्मिन् (घ) केन

**(iii) मूढैः <u>पाषाण खण्डेषु</u> रत्नसंज्ञा विधीयते।** (1)

(क) कस्मै (ख) का (ग) कुत्र/केषु (घ) कस्य

**(iv) शोक<u>ः धैर्यम्</u> नाशयति।** (1)

(क) कस्मात् (ख) कस्य (ग) केन (घ) किम्

**(v) श्वेतकेतुः <u>फले</u> बीजानि पश्यति।** (1)

(क) कस्मै (ख) का (ग) कुत्र (घ) कस्य

**प्रश्न 18. अधोलिखितेषु शुद्धम् अर्थम् चित्वा लिखत : - (1x4=4)**

**1. तरुः** - (वृक्षः / महीभृतः) **2. पयोदः** - (सागरः / मेघः)
**3. आपः** - (जलम् / वर्षा) **4. भूमिः** - (पृथ्वी / महीपतिः)

**प्रश्न 19. अधोलिखितैः पदैः वाक्यानि प्रपूर्य कथासूत्रम् योजयत -** (1/2x8=4)

**मञ्जूषा**

| |
|---|
| व्यापाद्य, ब्राह्मणोऽपि, चरणयो: , व्यापादितवान् , नकुलेन, दृष्ट्वा, पुत्रनिर्विशेषं , ब्राह्मणम् |

चिरकालपालितं इमं (i) ___________ नकुलं बालरक्षायाम् व्यवस्थाप्य गच्छामि। तथा कृत्वा गत:। ततस्तेन (ii) _____________ बालसमीपम् उपसर्पन् कृष्णसर्प: दृष्टम्। स: तं (iii) ___________ खण्डश: कृतवान्। अत्रान्तरे (iv) _____________ श्राद्धम् गृहीत्वा गृहम् उपावृत्त:। (v) _____________ दृष्ट्वा नकुल: रक्त-विलिप्त-मुख-पाद:तस्य (vi) ____________ अलुठत्। विप्र: तथाविधम् तं (vii) _____________ बालकोऽनेन खादित: इति अवधार्य कोपात् नकुलं (viii) _______________।